- Title – कारक शाब्दबोध प्रक्रिया
- Accession No – Title –
- Accession No –
- Folio No/ Pages – ५
- Lines-
- Size
- Substance Paper –
- Script Devanagari . देवनागरी
- Language – संस्कृत
- Period –
- Beginning – पालपदस्याशिशुपाल पदार्थः प्रथमा...
- End – इति श्रीविजयरामकृत कारकवादे शाब्दस्य बोध प्रक्रिया समाप्ता
- Colophon-
- Illustrations -
- Source -
- Subject - संस्कृत
- Revisor -
- Author - - श्री जयराम
- Remarks- अपूर्ण

उपाराना

(1)

पालपदस्य शिशुपालपदार्थः अथमासाधुत्वार्थिका लोपपदार्थः आश्रयतासंसर्गेण कर्मत्वेनेति कर्मत्वं च निरूपितत्वसंसर्गेण वर्तमानत्वं चाधेयतासंस
र्गेण धात्वर्थज्ञानेन्वेति ज्ञानं स्वाधेयतानिरूपकत्वसंसर्गेणाश्रयत्वेन्वेति आश्रयत्वं च इति त्वसंसर्गेण शिशुपालेन्वेति तथा च श्रीकृष्ण इति विषयतानिरूपित
विषयिताशालिवर्तमानताश्रयाभिन्न वा शक्यत्वज्ञाननिष्ठाधेयतानिरूपिताधिकरणताशाली शिशुपालः ॥ अथवा श्रीकृष्णविषयकद्वेषवान् शिशु
पालः ३ ॥ अध्ययनात्पराजयते बालः अध्ययनपदस्याध्ययनपदार्थः पंचम्याः कर्मत्वमर्थः धातो रसहिष्णुतार्थः सा च द्वेषः अशक्यत्वज्ञानं वा लटो वर्तमानत्वमर्थः
आख्यातस्याश्रयत्वमर्थः बालपदस्य बालपदार्थः अधिमासाधुत्वार्थिका अध्ययनपदार्थः आश्रयतासंसर्गेण विषयत्वरूपकर्मत्वेनेति तच्च स्वनिरूपितविषयतासंसर्गेण
वर्तमानत्वं चाधेयतासंसर्गेण धात्वर्थे द्वेषे अशक्यत्वज्ञानेन्वेति स च धात्वर्थः स्वनिष्ठाधेयतानिरूपितत्वसंसर्गेण आश्रयत्वेन्वेति तथा चाध्ययनवृत्तिविषयतानिरू
पितविषयताशालिवर्तमानताश्रयद्वेषनिष्ठाधेयतानिरूपिताधिकरणताशाली बालः ॥ अथवाध्ययनवृत्तिविषयतानिरूपितविषयताशालिवर्तमानत्वा
शक्यत्वज्ञानवान् बालः ॥ विप्राद्धनमादत्ते विप्रपदस्य विप्रपदार्थः पंचम्याः यथेष्टविनियोगोर्थः धनपदस्य धनपदार्थः द्वितीयायाः कर्मत्वम
ः तत्रात्र यथेष्टविनियोगरूपफलमेव धातोः यथेष्टविनियोगफलकस्वीकारोर्थः लटो वर्तमानत्वमर्थः आख्यातस्याश्रयत्वमर्थः तथा च विप्रपदार्थः संबं
धित्वेन पंचम्यर्थे यथेष्टविनियोगेन्वेति स चाव्यवहितोत्तरत्वसंबंधेन धात्वर्थतावच्छेदके विनियोगेन्वेति धनपदार्थः आश्रयतासंसर्गेण यथेष्टविनियोगेन्वे
ति स च जन्यतासंसर्गेण वर्तमानत्वं चाधेयतासंसर्गेण स्वीकारेन्वेति स्वीकारश्च स्वाधेयतानिरूपितत्वसंसर्गेणाश्रयत्वेन्वेति तथा च विप्रसंबंधिय
थेष्टविनियोगाव्यवहितोत्तरधनवृत्तियथेष्टविनियोगफलकस्वीकारवान् ॥ अधर्माज्जुगुप्सते अधर्मपदस्याधर्मपदार्थः पंचम्याः कर्मत्वमर्थः तत्रात्र कर्म
त्वे विषयत्वरूपं धातोः निंदार्थः लटो वर्तमानत्वमर्थः आख्यातस्याश्रयत्वमर्थः अधर्मपदार्थः आश्रयतासंसर्गेण विषयत्वेनेति तच्च स्वनि
रूपितविषयतासंसर्गेण वर्तमानत्वं चाधेयतासंसर्गेण धात्वर्थनिंदायामन्वेति सा च स्वाधेयतानिरूपितत्वसंसर्गेणाश्रयत्वेन्वेति
तथा चाधर्मवृत्तिविषयतानिरूपितविषयताशालिवर्तमानताश्रयनिंदानिष्ठाधेयतानिरूपिताधिकरणताशाली ॥ रामराम
अधर्माद्विरमति अधर्मपदस्याधर्मपदार्थः पंचम्याः कर्मत्वमर्थः धातोः कारणानंतराकरणमर्थः लटो वर्तमानत्वमर्थः आख्यातस्याश्रयत्वमर्थः अधर्मपदार्थः आश्रयतासं
सर्गेण कर्मत्वेनेति तच्च करणे चान्वेति वर्तमानत्वं चाधेयतासंसर्गेण धात्वर्थेन्वेति स च स्वाधेयतानिरूपितत्वसंसर्गेणाश्रयत्वेन्वेति तथा च धर्मवृत्तिकर्मताकवर्तमानत्वा २
श्रयकारणानंतराकरणनिष्ठाधेयतानिरूपिताधिकरणताशाली ॥ धर्मात्प्रमाद्यति धर्मपदस्य धर्मपदार्थः पंचम्या विषयत्वमर्थः धातोरनवधानमर्थः लटो वर्तमानत्व
मर्थः

॰गिता निरूपकाभावानुकूलवर्तमानत्वाश्रयव्यापारविषयकयत्नवान् ॥ स विभादं नाम्भितं वारयति सविषपदस्य विषविशिष्टोऽर्थः पंचमीसाधुत्वार्थिका अन्नपदस्य अन्न
पदार्थः पंचम्या वृत्तित्वमर्थः मित्रपदस्य मित्रपदार्थः द्वितीयायाः प्रतियोगित्वमर्थः धृतेः अभावानुकूलव्यापारोऽर्थः लटो वर्तमानत्वमर्थः आख्यातस्याश्रयत्वमर्थः सविषपदार्थः
अभेदसंसर्गेणान्वेति अन्नं च निरूपकत्वसंसर्गेण वृत्तित्वेऽन्वेति वृत्तित्वं चाधेयतासंसर्गेणाभावेऽन्वेति मित्रपदार्थः आश्रयतासंसर्गेण प्रतियोगित्वेऽन्वेति प्रतियोगित्वं च निरूपक
त्वसंसर्गेणाभावेऽन्वेति अभावश्च जन्यतासंसर्गेण वर्तमानत्वं चाधेयतासंसर्गेण व्यापारेऽन्वेति व्यापारश्च विषयतासंसर्गेण यत्नेऽन्वेति यत्नः कर्तरि प्रकारीभूय भासते तथा च वि
षविशिष्टान्ननिरूपितवृत्तित्वाश्रयमित्रवृत्तिप्रतियोगिता निरूपकाभावानुकूलवर्तमानत्वाश्रयव्यापारविषयकयत्नवान् ॥ आकाशं न पश्यति घटः चैत्रो वा आकाशप
दस्याकाशपदार्थः द्वितीयायाः विषयित्वं लक्षणया घटादिवृत्तित्वं द्वित्वं चार्थः नञो अभावोऽर्थः दृशधातोः लौकिकचाक्षुषप्रत्यक्षमर्थः लटो वर्तमानत्वमर्थः आख्यातस्य निरूपकत्वमर्थः
॰ति आकाशपदार्थः स्ववृत्तिविषयतानिरूपितत्वसंसर्गेण द्वितीयार्थे विषयित्वेऽन्वेति द्वित्वं आधेयतासंसर्गेण विषयित्वघटादिवृत्तित्वयोरन्वेति तदुभयं प्रतियोगितासंबंधेनाभा
॰न्वेति अभावश्चाधेयतासंबंधेन वर्तमानत्वं आधेयतासंसर्गेण धात्वर्थे तादृशप्रत्यक्षेऽन्वेति निरूपकत्वं च वृत्तित्वसंसर्गेण घटादावन्वेति तथा च वर्तमानत्वाश्रयलौकिकचाक्षुषप्र
॰त्यक्षमात्मान्य निरूपितवृत्तित्वाश्रयाकाशवृत्तिविषयतानिरूपितविषयित्वघटादिवृत्तित्वोभयप्रतियोगिताकाभावनिरूपकत्वाश्रयो घटादिः ॥ हिमवतो गंगा प्रभवति हि
॰त्यादस्य हिमालयोऽर्थः पंचम्या संयोगध्वंसाव्यवहितोत्तरक्षणवृत्तित्वमर्थः गंगापदस्य गंगापदार्थः प्रथमा साधुत्वार्थिका प्रपूर्वकभूधातोः आद्यबहिःसंयोगोऽर्थः ल
॰वर्तमानत्वमर्थः आख्यातस्याश्रयत्वमर्थः हिमालयः आश्रितासंसर्गेण पंचम्यर्थैकदेशे संयोगेऽन्वेति पंचम्यर्थः तादृशवृत्तित्वं वर्तमानत्वं चाधेयतासंसर्गेण धात्वर्थेऽन्वेति स
॰स्वाधेयतानिरूपितत्वसंसर्गेणाश्रयत्वेऽन्वेति आश्रयत्वं च वृत्तित्वसंसर्गेण गंगायामन्वेति तथा च हिमालयवृत्तिसंयोगध्वंसाव्यवहितोत्तरक्षणवृत्तिवर्तमानत्वाश्रयाद्यबहिः
संयोगनिष्ठाधेयतानिरूपिताधिकरणताशालिनी गंगा ॥ वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य वल्मीकाग्रपदस्य वल्मीकाग्रपदार्थः पंचम्या संयोगध्वंसाव्यवहि
तोत्तरक्षणवृत्तित्वमर्थः प्रपूर्वकभूधातोरूर्ध्वदेशसंयोगः लटो वर्तमानत्वमर्थः आख्यातस्याश्रयत्वमर्थः धनुःखण्डपदस्य धनुःखण्डपदार्थः प्रथमा साधुत्वार्थिका
आखण्डलपदस्य आखण्डलपदार्थः षष्ठ्याः संबंधोऽर्थः वल्मीकाग्रपदार्थः आश्रयतासंसर्गेण पंचम्यर्थैकदेशे संयोगेऽन्वेति पंचम्यर्थः तादृशवृत्तित्वं वर्तमानत्वं चाधेयता
संसर्गेण ऊर्ध्वदेशसंयोगरूपे धात्वर्थेऽन्वेति संयोगश्च स्वाधेयतानिरूपितत्वसंसर्गेणाश्रयत्वेऽन्वेति आश्रयत्वं चाधेयतासंसर्गेण धनुःखण्डेऽन्वेति आखण्डलपदार्थः
निरूपकत्वसंसर्गेण संबंधेऽन्वेति संबंधश्चाधेयतासंसर्गेण धनुःखण्डेऽन्वेति तथा च वल्मीकाग्रसंयोगध्वंसाव्यवहितोत्तरक्षणवृत्तिवर्तमानत्वाश्रयऊर्ध्वदेश
संयोगनिष्ठाधेयतानिरूपिताधिकरणताशालि आखण्डलनिरूपितसंबंधशालि धनुःखण्डं ॥ कस्मात्पराजयते शिशुपालः श्रीकृष्णपदस्य श्रीकृष्ण
पदार्थः पंचम्या कर्मत्वमर्थः धातोरसहिष्णुतार्थः असहिष्णुता चात्राभिभवाशक्यानुष्ठानं द्वेषो वा लटो वर्तमानत्वमर्थः आख्यातस्याश्रयत्वमर्थः शिशु

॰मे

ॐ

...र्थः प्रथमा साधुत्वार्थिका भूतत्वपदार्थः आश्रयत्वसंसर्गेणाधिकरणाभावेऽन्वेति तच्च स्वनिरूपिताधेयतासंसर्गेणाभावेऽन्वेति अभावश्च स्वप्रतियोगित्वसंबंधेन घटेऽन्वेति तथा च भूतलनिष्ठाधिकरणतानिरूपिताधेयता
...तियोगी घटः चर्मणि द्वीपिनं हंति चर्मपदस्य चर्मत्वपदार्थः सप्तम्या निरूपितत्वमर्थः तच्चात्र फलत्वेनेच्छाविषयत्वरूपमुद्देश्यत्वमेव द्वीपिपदस्य द्वीपिपदार्थः द्वितीयायाः कर्मत्वमर्थः तच्चात्र कर्मसंज्ञा प्राणवियोगरूपफलं हनधातोः प्राण
...गानुकूलव्यापारोऽर्थः लटो वर्तमानत्वमर्थः आख्यातस्य कृतिरर्थः चर्मपदार्थः आश्रयत्वसंसर्गेण चतुर्थ्यर्थउद्देश्यत्वेऽन्वेति तच्च प्रयोजकत्वसंसर्गेण धात्वर्थे व्यापारेऽन्वेति द्वीपिपदार्थः आश्रयतासंस
...योगेऽन्वेति स च जन्यतासंसर्गेण वर्तमानत्वं चाधेयतासंसर्गेण धात्वर्थे व्यापारेऽन्वेति स च जन्यतासंसर्गेण कृतावन्वेति कृतिः कर्तृश्च प्रकारीभूय भासते तथा च चर्मविषयकस्वत्वप्रकारके 3
...न्य द्वीपिवृत्तिप्राणवियोगानुकूलवर्तमानत्वाश्रयव्यापारानुकूलकृतिमान् मशकनिष्टौ धूमं करोति मशकनिष्टेतिपदस्य मशकनिष्टत्वपदार्थः सप्तम्या निमित्तत्वमर्थः तच्चात्र फ
...विषयत्वरूपमुद्देश्यत्वमेव धूमपदस्य धूमपदार्थः द्वितीयायाः कर्मत्वमर्थः तच्चात्र विषयत्वरूपफलं धातोः कृञोऽर्थः लटो वर्तमानत्वमर्थः आख्यातस्याश्रयत्वमर्थः म
...: आश्रयत्वसंसर्गेण चतुर्थ्यर्थउद्देश्यत्वेऽन्वेति तच्च प्रयोजकत्वसंसर्गेण धात्वर्थे कृतावन्वेति धूमपदार्थः आश्रयत्वसंसर्गेण कर्मत्वेऽन्वेति तच्च स्वनिरूपितविषयतासंसर्गेणाव
...धेयताधेयतासंसर्गेण कृतावन्वेति कृतिश्च स्वनिष्ठाधेयतानिरूपकत्वसंसर्गेणाश्रयत्वेऽन्वेति तथा च मशकनिष्टत्वविषयकेच्छाप्रयोज्यधूमत्वविषयतानिरूपितविषयि
...मानताश्रयफलनिष्ठाधेयतानिरूपिताधिकरणताशाली सीम्नि पुष्कलको हतः सीमपदस्य सीमपदार्थः सप्तम्या निमित्तत्वमर्थः तच्चात्र फलत्वेनेच्छाविषयत्वरू
...त्वं पुष्कलकपदस्य गंधमृगः प्रथमा साधुत्वार्थिका हनधातोः प्राणवियोगानुकूलव्यापारोऽर्थः क्तप्रत्ययस्य कर्मत्वं भूतत्वं चार्थः सीमपदार्थः आश्रयत्वसंसर्गेणोद्देश्य
...प्रयोजकत्वसंसर्गेण भूतत्वं चाधेयतासंसर्गेण धात्वर्थव्यापारेऽन्वेति व्यापारश्च जनकतासंसर्गेण प्राणवियोगफलरूपे कर्मत्वेऽन्वेति तच्चाधेयतासंसर्गेण पुष्कलपदार्थेऽन्वे
...च सीमविषयकस्वत्वप्रकारकेच्छाप्रयोज्यवर्तमानध्वंसप्रतियोगित्वनिष्ठव्यापारजन्यप्राणवियोगशाली गंधमृगः अविद्यारजनी त्ययमुदेति अविद्यापदस्याविद्या
...रजनीपदस्य रात्रिपदार्थः त्ययपदस्य ध्वंसोऽर्थः सप्तम्या उद्देश्यत्वमर्थः अयमुपदस्य उद्भासकप्रकाशेऽर्थः उत्पूर्वकइणधातोः उदयगिरिशिखरकर्मकारोहणमर्थः ल
...नत्वमर्थः आख्यातस्य कृतिरर्थः अविद्यापदार्थः अभेदसंसर्गेण रजन्यामन्वेति रजनी सप्तत्ययोगकत्वसंबंधेन त्ययेऽन्वेति त्ययश्चाश्रयतासंसर्गेणोद्देश्यत्वे
...प्रयोजकत्वसंसर्गेण वर्तमानत्वं चाधेयतासंसर्गेण धात्वर्थे व्यापारेऽन्वेति स च जन्यतासंसर्गेण कृतावन्वेति कृतिः कर्तृश्च प्रकारीभूय भासते तथा चाविद्याभिन्नरजनी
...गकत्ययविषयकेच्छाप्रयोज्यवर्तमानत्वाश्रयोदयगिरिशिखरकर्मकारोहणानुकूलकृतिमानयं ॥ शरदि पुष्यति सप्तच्छदः शरत्पदस्य शरत्पदार्थः सप्तम्या उत्प
...र्थः पुष्पधातोः पुष्पेऽर्थः लटो वर्तमानत्वमर्थः आख्यातस्याश्रयत्वमर्थः सप्तच्छदपदस्य सप्तच्छदपदार्थः प्रथमा साधुत्वार्थिका उत्पत्तिपदार्थः अधिकरणत्वसंबंध
...त्तावन्वेति उत्पत्तिश्च वृत्तित्वसंसर्गेण वर्तमानत्वे चाधेयतासंसर्गेण पुष्पेऽन्वेति पुष्पाश्च निरूपकत्वसंसर्गेणाश्रयत्वेऽन्वेति आश्रयत्वं च वृत्तित्वसंसर्गेण सप्तच्छदेऽन्वेति
...च शरदधिकरणकोत्पत्तिकव र्तमानत्वाश्रयपुष्पनिरूपिताश्रयत्वशालिनः सप्तच्छदः ॥ गुणकर्मान्यत्वे सति गुणकर्मान्यत्वपदगुणकर्मप्रतियो एम
...भेदार्थः सप्तम्या सामानाधिकरण्य मर्थः सत्वपदस्य सत्वपदार्थः गुणकर्मान्यत्वपदार्थः निरूपकत्वसंसर्गेण सामानाधिकरण्येऽन्वेति तच्च वृत्तित्वसंस ५

...ीतस्याश्रयत्वमर्थः धमिपदार्थः आश्रयतासंसर्गेण विषयत्वे न्वेति विषयत्वं च स्वनिरूपितविषयतासंसर्गेणावधाने न्वेति वर्त्तमानत्वं चाधेयतासंसर्गेणावधानाभावे न्वेति
स्वाधेयतानिरूपितत्वसंसर्गेणाश्रयत्वे न्वेति तथा च धर्मिवृत्तिविषयतानिरूपितविषयिताशालि अवधानप्रतियोगिकवर्त्तमानत्वाश्रयाभावनिष्ठाधेयतानिरूपिता
...णताशाली ॥ उपाध्यायादितरधत्ते शिष्यः उपाध्यायपदस्य उपाध्यायपदार्थः पंचम्या अवधित्वमर्थः धातोः स्वविषयकज्ञानविरोधव्यापारोर्थः लटो वर्त्तमानत्वमर्थः आख्यात
...तिरर्थः शिष्यपदस्य शिष्यपदार्थः प्रथमा साधुत्वार्थिका उपाध्यायपदार्थः निरूपकत्वसंसर्गेण अवधित्वे न्वेति तच्च ज्ञाने स्वसंसर्गेण धात्वर्थतावच्छेदकज्ञानत्वे न्वेति वर्त्तमानत्वं चाधेयतासंस
...र्गेण व्यापारे न्वेति स च जन्यतासंसर्गेण कृतावन्वेति कृतिः शिष्यप्रकारीभूय भासते तथा चोपाध्यायनिरूपितावधित्वशालि स्वविषयकज्ञानविरोधवर्त्तमानत्वाश्रयव्यापारानुकूल
...कृतिमान् शिष्यः ॥ दण्डात् घटः दण्डपदस्य दण्डपदार्थः पंचम्या हेतुत्वमर्थः घटपदस्य घटपदार्थः प्रथमा साधुत्वार्थिका दण्डपदार्थः आश्रयतासंसर्गेण हेतुत्वे न्वेति हेतुत्वं च स्वनिरूपितजन्यतासंस
...र्गेण घटपदार्थे न्वेति तथा च दण्डनिष्ठजनकतानिरूपितजन्यताशाली घटः ॥ धूमात् वह्निमान् धूमपदस्य धूमपदार्थः पंचम्या ज्ञापकत्वमर्थः वह्निपदस्य वह्निपदार्थः मतुपः अधिकरणत्वमर्थः धूमपदार्थः
...संसर्गेण ज्ञापकत्वे न्वेति तच्च स्वनिरूपितज्ञाप्यतासंबंधेन वह्नौ अन्वेति वह्निः स्वाधेयतानिरूपितत्वसंसर्गेणाधिकरणत्वे न्वेति तथा च धूमवृत्तिज्ञापकतानिरूपितज्ञाप्यताशालिवह्निनिष्ठाधे
...यतानिरूपिताधिकरणताशाली ॥ काष्ठात् पचति काष्ठपदस्य काष्ठपदार्थः पंचम्या जनकत्वमर्थः पचधातोः पाकोर्थः लटो वर्त्तमानत्वमर्थः आख्यातस्य कृतिरर्थः काष्ठपदार्थः आश्रयतासंसर्गेण जन
...कत्वे न्वेति तच्च स्वनिरूपितजन्यतासंसर्गेण वर्त्तमानत्वं चाधेयतासंसर्गेण धात्वर्थके न्वेति स च जन्यतासंसर्गेण कृतावन्वेति कृतिः कर्त्तरि प्रकारीभूय भासते तथा च काष्ठवृत्तिजनकतानिरूपितजन्यता
...शालिवर्त्तमानत्वाश्रयपाकानुकूलकृतिमान् ॥ दण्डाज्जायते घटः दण्डपदस्य दण्डपदार्थः पंचम्या अवधित्वमर्थः जनीधातोरुत्पत्तिरर्थः लटो वर्त्तमानत्वमर्थः आख्यातस्याश्रयत्वमर्थः घटपद
...स्य घटपदार्थः प्रथमा साधुत्वार्थिका दण्डपदार्थः आश्रयतासंसर्गेणावधित्वे न्वेति तच्च निरूपकत्वसंसर्गेण वर्त्तमानत्वं चाधेयतासंसर्गेणोत्पत्तौ अन्वेति उत्पत्तिश्च स्वाधेयतानिरूपितत्वसंबंधेनाधिकर
...णत्वे ... संसर्गेण घटे न्वेति तथा च दण्डावधिकवर्त्तमानत्वाश्रयोत्पत्तिनिष्ठाधेयतानिरूपिताधिकरणताशाली घटः ॥ गृहे स्थाल्यामोदनं पचति गृहपदस्य गृहपदार्थः सप्तम्या अधि
...करणत्वमर्थः स्थालीपदस्य स्थालीपदार्थः सप्तम्या अधिकरणत्वमर्थः ओदनपदस्य ओदनपदार्थः तदुत्तरद्वितीयायाः कर्मत्वमर्थः तच्च ... विक्लित्तिरूपफलं ... पचधातोः विक्लित्त्य
...नुकूलव्यापारोर्थः लटो वर्त्तमानत्वमर्थः आख्यातस्य कृतिरर्थः गृहपदार्थः आश्रयत्वसंसर्गेणाधिकरणत्वे न्वेति तच्च निरूपितत्वसंसर्गेण कर्त्तरि अन्वेति स्थालीपदार्थः आश्रयत्वसंसर्गेणाधि
...करणत्वे न्वेति तच्च स्वनिरूपिताधेयतासंसर्गेणोदनपदार्थे न्वेति ओदनपदार्थः आश्रयत्वसंसर्गेण कर्मत्वे न्वेति तच्च जन्यतासंसर्गेण वर्त्तमानत्वं चाधेयतासंसर्गेण धात्वर्थे व्यापारे न्वेति व्यापारश्च
...संसर्गेण कृतावन्वेति कृतिः कर्त्तरि प्रकारीभूय भासते तथा च स्थालीवृत्त्यधिकरणतानिरूपिताधेयताशाल्योदनवृत्तिविक्लित्त्यनुकूलवर्त्तमानत्वाश्रयव्यापारानुकूलकृतिमान् गृहनिष्ठाधिक
...रणतानिरूपककर्त्ता ॥ भूतले घटः भूतलपदस्य भूतलपदार्थः सप्तम्या अधिकरणत्वमर्थः घटपदस्य घटपदार्थः भूतलपदार्थः आश्रयत्वसंसर्गेणाधिकरणत्वे न्वेति तच्च निरूपितत्वसंसर्गेण घटे ॥
तथा च भूतलनिष्ठाधिकरणतानिरूपको घटः ॥ इति प्राचां मते नव्यमते भूतलपदस्य भूतलपदार्थः सप्तम्या आधेयत्वमर्थः घटपदस्य घटपदार्थः प्रथमा साधुत्वार्थिका भूतलपदार्थः निरूपक
...त्वसंसर्गेणाधेयत्वे न्वेति तच्च स्वनिष्ठसंसर्गेण घटे न्वेति तथा च भूतलनिरूपिताधेयताश्रयो घटः ॥ भूतले न घटः भूतलपदस्य भूतलपदार्थः सप्तम्या अधिकरणत्वमर्थः नञः अभावोर्थः घटपदस्य

धावतोऽश्वात्पतति धावधातोः शीघ्रगमनमर्थः शतृप्रत्ययस्य वर्त्तमानत्वं कर्त्ता चार्थः पंचमी साधुत्वार्थिका अश्वपदस्य अश्वपदार्थः पंचम्याः विभागजनकत्वमन्योन्याभाव
प्रतियोगितावच्छेदकत्वं चार्थः पतधातोः पतनमर्थः लटो वर्त्तमानत्वमर्थः आख्यातस्याश्रयत्वमर्थः वर्त्तमानत्वं आधेयतासंसर्गेण शीघ्रगमने ऽन्वेति तच्च जन्य
ता संसर्गेण कर्त्तरि पदार्थैकदेशे कृतावन्वेति कर्त्ता चाभेदसंसर्गेणाश्वेऽन्वेति अश्वस्याधिकरणतासंसर्गेण तं च स्वैकदेशे विभागेऽन्योन्याभावे चान्वेति पंचम्यर्थः आधेय
तासंसर्गेण वर्त्तमानत्वं चाधेयतासंसर्गेण धात्वर्थे पतनेऽन्वेति पतनं च स्वाधेयतानिरूपकत्वसंसर्गेणाश्रयत्वेऽन्वेति तथा च वर्त्तमानताश्रयशीघ्रगमनानुकूलकृतिमदभिन्नाश्वहति
विभागजनकत्वमन्योन्याभावप्रतियोगितावच्छेदकवर्त्तमानताश्रयपतनाश्रयः ॥ व्याघ्राद्बिभेति व्याघ्रपदस्य व्याघ्रपदार्थः पंचम्याः हेतुत्वमर्थः भीधातोः भयमर्थः लटो वर्त्तमान
त्वमर्थः आख्यातस्याश्रयत्वमर्थः व्याघ्रपदार्थः अधिकरणत्वसंसर्गेण हेतुत्वेऽन्वेति हेतुत्वं च स्वनिरूपितजन्यतासंसर्गेण वर्त्तमानत्वं चाधेयतासंसर्गेण धात्वर्थे भयेऽन्वेति भयं च स्वाधेयतानि
रूपकत्वसंसर्गेणाश्रयत्वेऽन्वेति तथा च व्याघ्रनिष्ठजनकतानिरूपितजन्यताशालिवर्त्तमानताश्रयभयनिष्ठाधेयतानिरूपिताधिकरणताशालि ॥ हस्तं त्यजति खगः हस्तपदस्य ह
स्तपदार्थः द्वितीयायाः कर्मत्वमर्थः तच्चात्र कर्मत्वं विभागरूपं फलमेव त्यजधातोः विभागानुकूलव्यापारोऽर्थः लटो वर्त्तमानत्वमर्थः आख्यातस्य कृतिरर्थः खगपदस्य खगपदार्थः प्र
थमा साधुत्वार्थिका हस्तपदार्थः आधेयतासंसर्गेण विभागेऽन्वेति विभागश्च जन्यतासंसर्गेण वर्त्तमानत्वं चाधेयतासंसर्गेण धात्वर्थव्यापारेऽन्वेति व्यापारश्च जन्यतासंसर्गेण कृतावन्वे
ति कृतिः खगे प्रकारीभूय भासते तथा च हस्तवृत्तिविभागानुकूलवर्त्तमानताश्रयव्यापारानुकूलकृतिमान् खगः ॥ वृक्षाद्विभजते वृक्षपदस्य वृक्षपदार्थः पंचम्याः अवधिरर्थः
कि भजधातोः विभागोऽर्थः लटो वर्त्तमानत्वमर्थः आख्यातस्याश्रयत्वमर्थः वृक्षपदार्थः आश्रयतासंसर्गेणावधित्वेऽन्वेति अवधित्वं च निरूपकत्वसंसर्गेण वर्त्तमानत्वं चाधेयतासं
विभागेऽन्वेति विभागश्च स्वाधेयतानिरूपकत्वसंसर्गेणाश्रयत्वेऽन्वेति तथा च वृक्षनिष्ठावधितानिरूपकवर्त्तमानताश्रयविभागनिष्ठाधेयतानिरूपिताधिकरणताशाली ॥ व्याघ्राद्वि
घ्रपदस्य व्याघ्रपदार्थः पंचम्या हेतुत्वमर्थः लटो वर्त्तमानत्वमर्थः आख्यातस्याश्रयत्वमर्थः व्याघ्रपदार्थः आश्रयतासंसर्गेण हेतुत्वेऽन्वेति हेतुत्वं च स्वनिरूपितजन्यतासंसर्गेण वर्त्तमा
ाधेयतासंसर्गेण धात्वर्थे भयेऽन्वेति भयं च स्वाधेयतानिरूपकत्वसंसर्गेणाश्रयत्वेऽन्वेति तथा च व्याघ्रनिष्ठजनकतानिरूपितजन्यताशालिवर्त्तमानताश्रयभयनिष्ठाधेयताधिकर
णताशाली ॥ शत्रोः परित्रायते शत्रुपदस्य शत्रुपदार्थः पंचम्या हेतुरर्थः धातोः भयाभावोऽर्थः लटो वर्त्तमानत्वमर्थः आख्यातस्य व्यापारोऽर्थः शत्रुपदार्थः आश्रयतासंसर्गेण हेतुत्वेऽन्वेति हेतु
त्वं स्वनिरूपितजन्यतासंसर्गेण धात्वर्थतावच्छेदकभयेऽन्वेति भयं च प्रतियोगित्वसंबंधेन वर्त्तमानत्वं चाधेयतासंसर्गेणाभावेऽन्वेति अभावश्च जन्यतासंसर्गेण व्यापारेऽन्वेति व्या
पारः प्रकारीभूय स्वाश्रये भासते तथा च शत्रुवृत्तिजनकतानिरूपितजन्यताशालिभयप्रतियोगिकवर्त्तमानताश्रयाभावानुकूलव्यापारवान् ॥ कूपादंधं वारयति कूप
पदस्य कूपपदार्थः पंचम्या हतित्वमर्थः अंधपदस्यांधपदार्थः द्वितीयायाः प्रतियोगित्वमर्थः धातोः भावानुकूलव्यापारोऽर्थः लटो वर्त्तमानत्वमर्थः आख्यातस्य यत्नोऽर्थः कूपपदार्थः नि
रूपकत्वसंसर्गेण हतित्वेऽन्वेति हतित्वं चाधेयतासंसर्गेण धात्वर्थतावच्छेदके अभावेऽन्वेति अंधपदार्थः आश्रयतासंसर्गेण प्रतियोगित्वेऽन्वेति प्रतियोगित्वं च निरूपितत्वसंसर्गेणाभावेऽन्वेति अ
भावश्च जन्यतासंसर्गेण वर्त्तमानत्वं चाधेयतासंसर्गेण व्यापारेऽन्वेति व्यापारश्च विषयतासंसर्गेण यत्नेऽन्वेति यत्नः कर्त्तरि प्रकारीभूय भासते तथा च कूपनिरूपितहतित्वाश्रयाधहति

अ

दकपदार्थः निरूपकत्वसंसर्गेण द्वितीयार्थवृत्तित्वेऽन्वेति वृत्तित्वं चाधेयतासंसर्गेण क्रियायामन्वेति क्रिया च जन्यतासंसर्गेण वर्तमानत्वं चाधेयतासंसर्गेण धात्वर्थव्यापारेऽन्वेति व्यापारश्च जन्यतासंस
र्गेणान्वेति कृतिः कर्तरि प्रकारीभूय भासते तथा च दत्तनिरूपितवृत्तित्वेनेच्छाविषयसंयोगानुकूलोदकनिरूपितवृत्तिताश्रयक्रियानुकूलवर्तमानव्यापारानुकूलकृतिमान

ॐ॥ पयसा हस्तमार्ष्टि चेति पयःपदस्य पयःपदार्थः तृतीयायाः करणतानिरूपितजन्यत्वमर्थः हस्तपदस्य हस्तपदार्थः द्वितीयायाः वृत्तित्वमर्थः अत्र शिष्धातोः संयोगानुकूलक्रियैवार्थः लटो वर्तमान
त्वमर्थः आख्यातस्य कृतिरर्थः पयःपदार्थः आश्रयतासंसर्गेण तृतीयार्थकरणत्वेऽन्वेति करणतानिरूपितजन्यत्वं च वृत्तित्वसंसर्गेण धात्वर्थेऽन्वेति हस्तपदार्थः निरूपकत्वसंसर्गेण द्वितीयार्थकर्मत्वेऽन्वेति 6
वृत्तित्वं चाधेयतासंसर्गेण धात्वर्थतावच्छेदकसंयोगेऽन्वेति संयोगश्च जन्यतासंसर्गेण वर्तमानत्वं चाधेयतासंसर्गेण धात्वर्थक्रियायामन्वेति सा च जन्यतासंसर्गेण कृतावन्वेति कृतिः कर्तरि प्रकारीभूय
भासते तथा च पयोवृत्तिकरणतानिरूपितजन्यताशालि हस्तनिरूपितवृत्तित्वाश्रयसंयोगानुकूलवर्तमानत्वाश्रयक्रियानुकूलकृतिमान ॥ ग्रामार्थी ज्ञानयति ग्रामपदस्य ग्रामपदार्थः चतुर्थ्याः
वृत्तित्वेनेच्छाविषयत्वमर्थः ज्ञापपदस्य ज्ञापपदार्थः द्वितीयायाः वृत्तित्वमर्थः संयोगानुकूलक्रियानुकूलव्यापारो नीधातोरर्थः लटो वर्तमानत्वमर्थः आख्यातस्य कृतिरर्थः ग्रामपदार्थः निरूपकत्वसं
सर्गेण चतुर्थ्यर्थैकदेशवृत्तित्वेऽन्वेति वृत्तित्वेनेच्छाविषयत्वं चाधेयतासंसर्गेण संयोगेऽन्वेति संयोगश्च जन्यतासंसर्गेण क्रियायामन्वेति ज्ञापपदार्थः निरूपकत्वसंसर्गेण द्वितीयार्थवृत्तित्वेऽन्वेति वृ
त्तित्वं चाधेयतासंसर्गेण क्रियायामन्वेति क्रिया च जन्यतासंसर्गेण वर्तमानत्वं चाधेयतासंसर्गेण धात्वर्थव्यापारेऽन्वेति व्यापारश्च जन्यतासंसर्गेण कृतावन्वेति कृतिः कर्तरि प्रकारीभूय भासते ॥
ग्रामनिरूपितवृत्तित्वेनेच्छाविषयसंयोगानुकूलाजानिरूपितवृत्तिताश्रयक्रियानुकूलवर्तमानत्वाश्रयव्यापारानुकूलकृतिमान ॥ शत्रवेऽसूयति ॥ हरये रोचते ॥ पुत्राय गां ददाति
कायवस्त्रं ददाति ॥ स्वकस्य वस्त्रं ददाति ॥५ नारदाय रोचते कलहः नारदपदस्य नारदपदार्थः चतुर्थ्याः संबन्धोऽर्थः धातोः रुचिपदार्थः लटो वर्तमानत्वमर्थः आख्यातस्य विषयत्वमर्थः वै
हपदस्य कलहपदार्थः प्रथमा साधुत्वार्था नारदपदस्य नारदपदार्थः निरूपकत्वसंबन्धेन चतुर्थ्यर्थसंबन्धेऽन्वेति संबन्धश्च वृत्तित्वसंबन्धेन वर्तमानत्वं चाधेयतासंबन्धेन धात्वर्थे रुचावन्वेति ॥
चेच्छा निरूपकत्वसंसर्गेण विषयत्वेऽन्वेति विषयत्वं च वृत्तित्वसंसर्गेण कलहपदार्थेऽन्वेति तथा च नारदनिरूपितसंबन्धशालि वर्तमानत्वाश्रयरुचिवृत्तिविषयतानिरूपितविषयताशाली
कलहः ॥ वैश्याय शतं धारयति वैश्यपदस्य वैश्यपदार्थः चतुर्थ्याः संबन्धोऽर्थः शतपदस्य शतपदार्थः द्वितीयायाः कर्मत्वमर्थः धृञ्धातोः पुनर्दानप्रतिज्ञापूर्वकद्रव्यग्रहणानुपधारणमर्थः लटो वर्त
मानत्वमर्थः आख्यातस्य आश्रयत्वमर्थः वैश्यपदार्थः निरूपकत्वसंसर्गेण संबन्धेऽन्वेति संबन्धश्च वृत्तित्वसंसर्गेण शतपदार्थेऽन्वेति शतपदार्थः आश्रयतासंसर्गेण कर्मत्वेऽन्वेति वर्तमानत्वं चा
धेयतासंसर्गेण धात्वर्थेऽन्वेति स च स्वाधेयत्वनिरूपकत्वसंसर्गेण आश्रयत्वेऽन्वेति तथा च वैश्यनिरूपितसंबन्धशालिशतवृत्तिकर्मताकवर्तमानत्वाश्रयपुनर्दानप्रतिज्ञापूर्वकद्रव्यग्रहणनिष्ठाधेयता
निरूपिताधिकरणताशाली ॥ रुद्राय गां ददाति रुद्रपदस्य रुद्रपदार्थः चतुर्थ्याः उद्देश्यत्वमर्थः गोपदस्य गोपदार्थः द्वितीयायाः कर्मत्वमर्थः धातोः दानमर्थः लटो वर्तमानत्वमर्थः आख्यात
स्य कृतिरर्थः रुद्रपदार्थः आश्रयत्वसंसर्गेण उद्देश्यत्वेऽन्वेति गोपदार्थः आश्रयतासंसर्गेण कर्मत्वेऽन्वेति तच्च कर्मत्वं जन्यतासंसर्गेण वर्तमानत्वं चाधेयतासंसर्गेण धात्वर्थदानेऽन्वेति स च ज
न्यतासंसर्गेण कृतावन्वेति कृतिः कर्तरि प्रकारीभूय भासते तथा च रुद्रोद्देश्यकगोवृत्तिकर्मताकवर्तमानत्वाश्रयदानानुकूलकृतिमान ॥ वृक्षात्पर्णं पतति वृक्षपदस्य वृक्षपदा
र्थः पंचम्याः विभागजनकत्वं अन्योन्याभावप्रतियोगितावच्छेदकत्वं चार्थः पर्णपदस्य पर्णपदार्थः प्रथमा साधुत्वार्थिका पतधातोः पतनमर्थः लटो वर्तमानत्वमर्थः आख्यातस्य आश्रय
त्वमर्थः वृक्षपदार्थः आश्रयतासंसर्गेण पंचम्यर्थैकदेशे विभागे अन्योन्याभावे चान्वेति पंचम्यर्थः वृत्तित्वसंसर्गेण वर्तमानत्वं चाधेयतासंसर्गेण धात्वर्थे पतनेऽन्वेति पतनं च स्वाधेयतानिरूपक
त्वसंसर्गेण आश्रयत्वेऽन्वेति आश्रयत्वं वृत्तित्वसंसर्गेण पर्णेऽन्वेति तथा च वृक्षवृत्तिविभागजनकवृक्षवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकवर्तमानत्वाश्रयपतननिष्ठाधेयतानिरूपिताधिकरणताशाली
पर्णं ॥

…ति तथाच गुणकर्मकप्रतियोगिकभेदनिरूपितसाधिकरणता अयः स्तवे गोदुह्यमानास्वागतः गोपदस्य गोपदार्थः सप्तम्याः कर्मत्व
…दुहनमर्थः शानचो वर्त्तमानत्वमर्थः सप्तम्याः समानकालीनत्वमर्थः आङ्पूर्वकगमेरागमनमर्थः क्तप्रत्ययस्य भूतत्वं कर्त्ता चार्थः गोपदा
…र्थस्य दुह्यमान… [illegible] विशेष्यतासंसर्गेण कर्मत्वे इति कर्मत्वं च विशेष्यतासंसर्गे वर्त्तमानत्वं चाधेयतासंसर्गेण दुहनपदार्थे इति स च निरूपक
…समानकालीनत्वे इति तच्च वर्त्तमानत्वं चाधेयतासंसर्गेणागमने इति आगमनं च जन्यतासंसर्गेण क्तप्रत्ययार्थैकदेशे कृतावत्वे इति तथा
…च कर्मताविशेषणवर्त्तमानता अय दोहननिरूपितसमानकालीनवर्त्तमानध्वंसप्रतियोग्यागमनानुकूलकृतिमान् दण्डीपु
…रुषस्य दण्डविशिष्टो प्रथमा साधुत्वार्थिका पुरुषपदस्य पुरुषपदार्थः प्रथमा प्रकृत्यर्थः अनुवादका गमधातोः संयोगानुकू
…लवर्त्तमानत्वमर्थः आख्यातस्य कृतिरर्थः दण्डिपदार्थः अभेदसंसर्गेण पुरुषे इति वर्त्तमानत्वं चाधेयतासंसर्गेण धात्वर्थे आ
…जन्यतासंसर्गेण कृतावत्वे इति कृतिः कर्त्तरि प्रकारीभूय भासते तथा च वर्त्तमानता अय संयोगानुकूलव्यापारानुकूलकृतिमा
…न्दण्डी पुरुषः गोदुह्यमानास्वागतः गोपदस्य गोपदार्थः सप्तम्याः कर्मत्वमर्थः दुहधातोः दुहनमर्थः क्तप्रत्ययस्य भूतत्वमर्थः त
…त्वमर्थः सप्तम्याः समानकालीनत्वमर्थः आङ्पूर्वकगमेरागमनमर्थः क्तप्रत्ययस्यातीतत्वं कर्त्ता चार्थः गोपदार्थः विशेष्यता
…ति कर्मत्वं च विशेष्यतासंसर्गेण दोहने इति तच्च अयतासंसर्गेण प्रतियोगित्वे इति प्रतियोगित्वं चाविशेष्यतासंसर्गेण ध्वं
…सनिरूपकत्वसंसर्गेण समानकालीनत्वे इति समानकालीनत्वं वर्त्तमानत्वं चाधेयतासंसर्गेण धात्वर्थव्यापारे इति व्यापा
…रश्च क्तप्रत्ययार्थैकदेशे कृतावत्वे इति तथाच गोविशेषणकर्मताविशेषणदोहनवृत्तिप्रतियोगिताकप्रागभावनिरूपितसमान
…पितकालीनता अय वर्त्तमानता अय संयोगानुकूलव्यापारानुकूलकृतिमान् गोषु दुह्यमानास्वागतः गोपदस्य गोपदार्थः स
…त्वमर्थः दुहधातोः दुहनमर्थः शानप्रत्ययस्य भविष्यत्वमर्थः तच्च प्रागभावप्रतियोगित्वमर्थः सप्तम्याः समानकालीनत्वमर्थः आङ्पूर्वकगमेरागम
…प्रत्ययस्य भूतत्वं कर्त्ता चार्थः गोपदार्थः विशेष्यतासंसर्गेण कर्मत्वे इति कर्मत्वं च विशेष्यतासंसर्गेण दोहने इति तच्च अयतासंसर्गेण प्रतियोगि
…योगित्वं च विशेषणतासंसर्गेण प्रागभावे इति स च निरूपकत्वसंसर्गेण समानकालीनत्वे इति तच्च भूतत्वं चाधेयतासंसर्गेण धात्वर्थव्यापारे इति व्या
…तासंसर्गेण क्तप्रत्ययार्थैकदेशे कृतावत्वे इति तथाच गोविशेषणकर्मताविशेषणदोहनवृत्तिप्रतियोगिताकप्रागभावनिरूपितसमान
…कालीनातीतसंयोगानुकूलव्यापारानुकूलकृतिमान् इति श्रीजयरामकृतकारकवादे शाब्दबोधप्रक्रिया समाप्ता ::::::::